दिनाङ्क :-26.03.2025 प्रात: - 06:55

## अथ वार्ताः

### गुजरातराज्यम्

गुजरातप्रदेश: उत्तराखण्डराज्यस्य अनन्तरम् देशस्य द्वितीयं राज्यं भविष्यति यत्र समान-नागरिक-संहिता प्रवर्तयिष्यति। विधानसभां सम्बोधयन् राज्यस्य विधिमन्त्री ऋषिकेशपटेल: अवदत् यत् राज्यस्य सर्वेभ्य: जनेभ्य: समानं न्यायं सुनिश्चितुं एकभारत-श्रेष्ठभारत इत्येतस्य परिकल्पनां साकारीकर्तुं च एकं सोपानमस्ति इति। मन्त्रिणा निगदितं यत् न्यायिकप्रक्रियाया: गतिं वर्धायितुं राज्यप्रशासनेन राजकेट-सूरत-वडोदरा-जनपदानां मुख्यालयेषु त्रयाणां नवीनानाम् मध्यस्थ-न्यायाधिकरणानां प्रावधानम् कृतमस्ति। राज्ये नगरपालिकानां पञ्चायतानाञ्च याचनानां श्रवणं मध्यस्थ-न्यायाधिकरणे कर्तुमपि निर्णयोजात:।

### लोकसभा-वित्तविधेयकम्

लोकसभाया पञ्चविंशत्यधिक-द्विसहस्र-तमवर्षीयं वित्तविधेयकम् अनुमोदितम् यस्मिन् पञ्चत्रिंशत्-सर्वकारीय-संशोधनानि समाविष्टानि सन्ति यस्योद्देश्यं शुल्कस्य दैशिक-विनिर्माणस्य वर्धनम् इति वर्तते। पञ्चविंशत्यधिक-षड्विंशत्यधिकद्विसहस्रतमवर्षयो: वित्तवर्षस्य कृते केन्द्रप्रशासनस्य वित्तीयप्रस्तावान् प्रभावयितुं विधेयकमेतत् प्रयुज्यते। विधेयकं समाश्रित्य केन्द्रीयवित्तमन्त्री निर्मलासीतारामन् इत्येषा उक्तवती यत् वित्तविधेयकमिदम् अस्य वर्षस्य करदातृभ्य: अप्रतिमकर-साहाय्यं व्यापारे च सरलतां प्रदास्यति।

### राज्यसभापात्विधेयकम्

ह्य: राज्यसभाया: स्वीकृते: अनन्तरं संसदा आपत्प्रबन्धनसंशोधन-विधेयकं चतुर्विंशत्यधिकद्विसहस्रतमवर्षीयं पारितम्। अवधेयं वर्तते यत् विगतवर्षे दिसम्बरमासे लोकसभया इदं विधेयकं पारितमासीत्। अस्य विधेयकस्य प्रयोजनम् समग्रे हि देशे आपद: प्रतिक्रियाया: सज्जताया: प्रनर्प्राप्ते: च संवर्धनमिति वर्तते। एवत् विधेयकं आपत्प्रबन्धनाधिनियमे पञ्चविंशत्यधिक द्विसहस्रतमे वर्षे संशोधनं करोति अथ च राष्ट्रियापत्प्रबन्धप्राधिकरण-राज्यापात्प्रबन्धनप्राधिकणयो: कुशलं कार्याचरणं सुदृढीकरोतीति।

### राजीव-गौबा:

पूर्वमन्त्रिमण्डलसचिव: राजीवगौबा-इत्येष: नीत्यायोगस्य पूर्णकालिकसदस्य: नियुक्त:। झारखण्डसम्भागस्य द्व्यशीत्यधिकनवदशशततमवर्षस्य भारतीय-प्रशासनिकसेवाधिकारी श्रीगौबा: नवदशाधिकद्विसहस्रतमवर्षात् चतुर्विंशत्यधिक-द्विसहस्रतमवर्ष पर्यन्तं देशस्य शीर्षाधिकारीत्वेन कार्यं सम्पादितवान्। असौ भारतस्य कोविड-नवदशमहामार्या: समये प्रतिक्रियाम् आर्थिकपरिष्कार-रणनीतय: समेत्य प्रमुख-नीतिगत-निर्णयानां संचालनाय महत्वपूर्णं भूमिकां निभालितवान्।

### अन्ताराष्ट्रिय-श्रम-सङ्घटन

भारतस्य सामाजिक-सुरक्षा-व्याप्तिः महती वर्धितास्ति। अन्ताराष्ट्रिय-श्रम-सङ्घटनस्य अनुसारं भारतस्य सामाजिक-सुरक्षा-व्याप्तिः एकविंशत्यधिकद्विसहस्र तमे वर्षे चतुर्विंशति दशमलव चत्वारि प्रतिशतात् चतुर्विंशत्यधिक द्विसहस्र तमे वर्षे अष्टचत्वारिंशत् दशमलव अष्ट प्रतिशतं यावत् द्विगुणितम् अभवत्। आईएलओ विश्व-सामाजिक-

सुरक्षा प्रतिवेदनम् उद्धृत्य केन्द्रीय-श्रम-मन्त्री मनसुख-माण्डविया: कार्यक्षेत्रे सामाजिक-सुरक्षा-लाभानां विस्तारे कृतप्रगतिम् अधोरेखितवान्।

**<u>एम्. आर्.आई. यन्त्रं</u>**

भारतं स्वस्य प्रथमं स्वदैशिकं चुम्बकीय-अनुनाद-इमेजिङ्ग् एम्.आर्.आई. इति यन्त्रं विकसितम्, यत् नवदेहली-नगरस्य अखिलभारतीयायुर्विज्ञान-संस्थाने अक्टोबर्-मासपर्यन्तं परीक्षणार्थं स्थापितं भविष्यति।

**<u>सुवर्णयोजना</u>**

सुवर्ण-मुद्राकरणयोजनाया: मध्यमावधिक-दीर्घावधिक-सर्वकारीयनिक्षेपस्य घटका: अद्य प्रभृति निरस्ता: भविष्यन्ति। वित्तमन्त्रालयेन प्रतिपादितं यत् स्वर्ण-मुद्राकरण-योजनाया: निष्पादनस्य परीक्षणस्य विपण्यस्थित्या: विकासस्य च अनन्तरं एष: विराम: जात:।

**<u>आईपीएल्</u>**

इण्डियनप्रीमीयरलीग-इत्येतस्यां क्रिकेटमालिकायां ह्य: रात्रौ अहमदाबाद-नगरस्य नरेन्द्रमोदीक्रीडाङ्गणे पञ्जाबकिंग्सदलेन गुजरात-टाइटन्सदलं एकादश धावनाङ्कै: पराभूतम्। अद्य गुवाहाट्यां राजस्थान रॉयल्स कोलकातानाइटराइडर्सदलयोर्मध्ये द्वन्द्वं भविष्यति।

।। <u>इति वार्ता:</u>।।